तत्सामिधेनीरन्वाह । यस्मिन् सुन्वन्ति तस्मिन् सामिधेनीः इति प्राप्ते । पूर्वसवर्णः – 'धीती' (ऋ. १.१६४.८)। मती । 'सुष्टुती' (ऋ. २.३२.४)। धीत्या, मत्या, सुष्टुत्या इति प्राप्ते । आ – 'द्वा यन्तारा' (तै. सं. ४.६.९.३) । द्वौ यन्तारौ इति प्राप्ते । आत् – न ताद् ब्राह्मणाद् निन्दामि । तान् ब्राह्मणान् इति प्राप्ते । शे – न 'युष्मे वाजबन्धवः' (ऋ. ८.६८.१९) । 'अस्मे इन्द्राबृहस्पती' (ऋ. ४.४९.४) । यूयं वयम् इति प्राप्ते । यूयादेशो वयादेशश्च छान्दसत्वान् न भवति । या – 'उरुया' (मै. ३.७.८) । धृष्णुया । उरुणा, धृष्णुना इति प्राप्ते । डा – 'नाभा पृथिव्याम्' (अ. ७.६१.१) । नाभौ पृथिव्याम् इति प्राप्ते । ड्या – 'अनुष्टुप्योच्च्यावयतात्' (मै. ४.१३४.२५) । अनुष्टुभा इति प्राप्ते । याच् – 'साधुया' (ऋ. १०. ६६.१२) । साधु इति सोर्लुकि प्राप्ते । आल् – 'वसन्ता यजेत' (मै. २.३.४) । वसन्ते इति प्राप्ते ।

[८२०] इयाडियाजीकाराणामुपसङ्ख्यानम् । (म. भा. ३.२५६)

इया – 'उर्विया परि ख्यन्' (ऋ. १०.१०.२) । दार्विया परिज्मन् । उरुणा, दारुणा इति प्राप्ते । डियाच् – 'सुक्षेत्रिया सुगातुया' (ऋ. १.९७.२) । सुक्षेत्रिणा, सुगात्रिणा इति प्राप्ते । ईकारः – 'दृतिं न शुष्कं सरसी शयानम्' (ऋ. ७.१०३.२) । सरसि शयानम् इति प्राप्ते ।

[८२१] आङ्याजयारां चोपसङ्ख्यानम् । (म. भा. ३.२५७)

आङ – 'प्र बाहवा' (ऋ. २.३८.२) । प्रबाहुना इति प्राप्ते । अयाच् – 'स्वप्नया सचसे जनम्' (अ. ५. ७. ८)। स्वप्नेन इति प्राप्ते । अयार् – 'स नः सिन्धुमिव नावया' (ऋ.१. ९७ ८) । नावा इति प्राप्ते ॥

## अमो मश् । (४०/३५६२)

अमः प्रति मिबादेशो गृह्यते । तस्य छन्दसि विषये [1]मशादेशो भवति । 'वर्धीं वृत्रम्' (ऋ. १. १६५.८) । क्रमीं वृक्षस्य शाखाम् । लुङि 'बहुलं छन्दस्यमाङ्योगेऽपि' (६.४.७५/३५४६) इत्यडागमाभावः । शित्करणं सर्वादेशार्थम् । मकारस्यापि हि मकारवचनमनुस्वारनिवृत्त्यर्थं स्यात् ॥

---

1. मश् इति आदेशः ब. ड.